Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३०
जून - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मस्तिष्कस्य सर्विसस्टेशन




साहित्यस्य गुणोपेता प्रतिष्ठा न केवलं प्रबुद्धान्, अपि तु सामान्यजनान् अपि नितरां स्पृशति । सुदूरे वर्तमानाः पाठकाः अपि पठनमात्रेण लेखकैः सह सुचारु संवादं कुर्वन्ति । लेखकानां च परिचयं प्राप्नुवन्ति । आधुनिके कालयोगे सहृदयः मनुष्यः निबन्धानाम् आस्वादनेन अपि लेखकस्य आन्तरिकं वैभवम् आकलयितुं शक्नोति । न केवलं बुद्धिसामर्थ्यतः, अपि तु भावतः लिखितस्य निबन्धस्य सत्त्वम्, पाठकस्य न केवलं हृदयं क्लेदयति, प्रत्युत तस्य जीवनरेखायाम् अपि महत् परिवर्तनम् आनयति।

निबन्धस्य स्वभावः अपि ज्ञातव्यः । निबन्धः लेखकस्य परिचयं कारयति । पाठकः लेखकेन सह अमिलित्वा अपि तस्य शीलं पारयितुं शक्नोति। क्वचित् लेखकस्य कपटलिप्तान् अभिप्रायान् अपि सुज्ञः पाठकः अवगन्तुं शक्नोति। उत्तमः निबन्धः पाठकं प्रति मृदु निवेदनं करोति। तदपि क्वचित् स्मितं कारयति, क्वचित् करुणया वा हृदयं स्पन्दयति। सः क्वचित् राष्ट्रभक्तिं जनयति, क्वचिद् परमतत्त्वस्य वा सलिले निमज्जयति। निबन्धस्य मार्गः निश्चितः नास्ति। सः सर्वत्र विहर्तुम् उत्सहते। अतः एव निबन्धेन सह चलन् मनुष्यः ब्रह्माण्डे अपि विहर्तुम् अवसरं लभते।

निबन्धस्य उपदेशे कापि रुचिः नास्ति। सः तु लेखकस्य परिपूतहृदयात् निःसृतः कोऽपि काव्यात्मकः रसः वर्तते। सः उपदेशं विना एव पाठकस्य जीवनं सिञ्चति। अत्रापि लेखकस्य 'अहम् अधिकं जानामि' इति आरोपः नास्ति । निबन्धस्य उद्देश्यं तु लेखक-पाठकयोः भेदं दूरीकृत्य, तयोः एकस्मिन् संवादे समभावेन नियोजनम् अस्ति। या दृष्टिः लेखकस्य वर्तते, सा एव पाठकस्य अपि भवितुम् अर्हति। निबन्धं पिबन् पाठकः लेखकस्य विचारोद्याने अनायासं विहारं करोति।

उत्तमः निबन्धः औत्सुक्येन, औचित्येन, औदार्येण च समृद्धः भवति । निबन्धः अर्थात् किम् ? मस्तिष्कस्य सर्विसस्टेशन!

## राज्ञा अवगतः पाठः



कश्चन राजा आसीत् । तस्य उभौ पुत्रौ । तदीयं द्वितीयं पुत्रं निस्सन्तानः श्यालः स्वगृहं नीतवान् । मातुलस्य, गृहे सन्तोषेण अवर्धत सः बालः । दश वर्षाणि सर्वं सुचारुतया एव आसीत् । किन्तु अनन्तरकाले अनूह्याः घटनाः घटिताः । ज्येष्ठः राजपुत्रः वैराग्यं प्राप्य संन्यासाश्रमम् अवलम्बितवान्, सुदूरे स्थिते पर्वते कुटीरं निर्माय वासम् आरब्धवान् च । अत्रान्तरे राज्ञः श्यालेन सन्तानः प्राप्तः आसीत् अपि । अतः द्वितीयः राजकुमारः प्रासादं प्रति आनीतः ।

आ बाल्यात् मातुलगृहे प्रवृद्धाय राजकुमाराय प्रासादपरिसरः न अरोचत । सर्वे अपरिचिताः एव आसन् तत्र । तस्मात् बालके असन्तोषः प्रवृद्धः । तस्य कोपशीलता रूक्षता चापि वृद्धिं गते । अध्ययने सः अनासक्तः जातः । विनयः विधेयता च तस्मिन् विलुप्ते ।

तस्य अध्ययनव्यवस्थार्थं राज्ञा महान्तः पण्डिताः नियुक्ताः । किन्तु तेषु कोऽपि तम् एकं दिनम् अपि अध्यापयितुं न शक्तः । अध्ययनाय तैः आदिष्टः बालः तिरस्कारेण पश्यन् शयनप्रकोष्ठं गत्वा शेते स्म । तर्जनं, भर्त्सनम्, आदेशः, भीतेः उत्पादनं, दण्डनम् इत्यादयः सर्वे उपायाः विफलाः जाताः । बोधनं तु सर्वथा न शृणोति स्म राजकुमारः । अतः सर्वे पण्डिताः राज्ञः असन्तोषसम्भावनाम् अपि उपेक्ष्य ततः निर्गताः । ''राजकुमारे कापि दुष्टशक्तिः आविष्टा अस्ति इति भाति'' इति अवदत् मन्त्री। तदा पृष्टं राज्ञा – ''तस्याः निवारणं कथम् ?'' इति।

''प्रायः तत् कर्तुं वयं न समर्थाः । राजधानीतः अनतिदूरे पर्वतमूले नद्याः तीरे कश्चन संन्यासी निवसति । जनानां मेलनं सर्वथा अनिच्छन् एकान्ते निवसति सः । यदि भवान् एव गत्वा स्वसमस्यां निवेदयेत् तर्हि सः तद्विषये अवधानं दद्यात् अपि । राजकुमारस्य परिष्कारः कथम् इति सः सूचयेत् अपि'' इति अवदत् मन्त्री।

राजा मन्त्रिणः प्रस्तावम् अङ्गीकृतवान् । ततः सः मुनेः आश्रमं गत्वा तं भक्त्या प्रणम्य स्वस्य परिचयम् अपि निवेदितवान् । तदा मुनिः अवदत् ''राजा भवान् मादृशस्य उपकारं कर्तुम् अर्हति । किन्तु मया राज्ञः भवतः कीदृशं साहाय्यं कर्तुं शक्येत ? भवतः आगमनस्य कारणं किम् ?'' इति।

''मुनिवर्य ! इदानीं पामरः जातः अस्मि अहमेव । प्रायः मादृशः दुःखी अन्यः न स्यात्'' इति वदन् राजा स्वसमस्यां विस्तरेण निवेदितवान् । मुनिः श्मश्रु आमृशन् क्षणकालं नेत्रे निमील्य चिन्तनम् अकरोत् । ततः सः गम्भीरेण स्वरेण अवदत् – ''यदि भवान् व्याघ्रस्य मुखरोमाणि आनयेत् तर्हि अहं भवतः पुत्रस्य परिष्कारे साहाय्यं कुर्याम् । तानि मुखरोमाणि जीवतः व्याघ्रस्य स्युः । भवता एव सङ्गृहीतानि स्युः'' इति।

''व्याघ्रस्य मुखरोम्णां सङ्ग्रहः ! सर्वथा असाध्यम् एतत्'' इति अवदत् राजा।

''पुत्रस्य परिष्कारः यावान् क्लेशकरः तावान् क्लेशकरः तु न व्याघ्रस्य मुखरोम्णां सङ्ग्रहः । अतः प्रयत्यताम्'' इति उक्त्वा मुनिः आसनात् उत्थितवान्। राजा चिन्ताक्रान्तः सन् एव प्रासादं प्रत्यागतवान्। राजोद्याने गुहायां कश्चन व्याघ्रः पालितः आसीत् तेन । अतः सः व्याघ्रपालकम् आहूय अपृच्छत् ''किं मया व्याघ्रः स्प्रष्टुं शक्येत ?'' इति।

''सर्वथा न शक्यते महाराज ! स्पर्शनं किं, तत्समीपे गमनमपि अपायकरम्। अहमपि तत्समीपं न गच्छामि। दण्डसाहाय्येन दूरात् एव तस्मै आहारं ददामि'' इति।

एतत् श्रुत्वा अपि राजा सर्वथा निराशः न जातः । कथमपि कार्यं साधनीयम् एव इति विचारः तस्य मनसि प्रबलः आसीत्। अतः अनन्तरदिने सः किञ्चित् आहारं स्वीकृत्य व्याघ्रगुहासमीपं गतवान्। दण्डसाहाय्येन आहारं व्याघ्रसमीपे स्थापयित्वा द्वारात् बहिः स्थितवान्। व्याघ्रः गाम्भीर्येण आगत्य राज्ञा दत्तम् आहारं स्व्यकरोत्, राजानं गाम्भीर्येण एव सकृत् अपश्यत् च।

राजा पक्षं यावत् एवमेव आचरत्। तदनन्तरदिने राजा आहारयुक्तः सन् गुहाद्वारसमीपे अतिष्ठत्। व्याघ्रः घुर्घुरायमाणः क्षणकालं द्वारसमीपे अतिष्ठत्। ततः द्वाररन्ध्रे मुखं प्रसार्य राज्ञः हस्तस्थे पात्रे स्थितम् आहारम् असेवत च।

एवमेव पुनरपि कानिचन दिनानि अतीतानि। एकस्मिन् दिने आहारस्वीकारस्य अनन्तरं व्याघ्रः जिह्वया राज्ञः हस्तस्य लेहनम् अकरोत्। अग्रिमेषु दिनेषु आहारसेवनसमये व्याघ्रः राज्ञः हस्तस्य लेहनं करोति स्म।

एवं मासात्मकः कालः अतीतः । इदानीं व्याघ्रः राजानं दृष्ट्वा न गर्जति । राजा अपि ततः न विभेति । एकस्मिन् दिने राजा व्याघ्रेण सह प्रीत्या व्यवहरन् कर्तर्या तदीयानि द्वित्राणि मुखरोमाणि कर्तितवान्। व्याघ्रेण अल्पोऽपि विरोधः न कृतः। केषाञ्चित् दिनानाम् अनन्तरं राजा धैर्यं वहन् व्याघ्रस्य शिरः अस्पृशत्।

व्याघ्रस्य मुखरोम्णां प्राप्त्या राजा नितरां सन्तुष्टः। सः मुनेः आश्रमं गत्वा व्याघ्रस्य मुखरोमाणि तस्य पुरतः संस्थापितवान्। मुनिः तु तानि अवकरम् इव पार्श्वे अक्षिपत्।

''राजन्। पुत्रस्य परिष्कारः कथं करणीयः इति अवगतं स्यात् खलु भवता ? व्याघ्रस्यैव प्रीतिः सम्पादयितुं यदि शक्या तर्हि मानवस्य प्रीतिः कथं न प्राप्येत ? आदौ भवता पुत्रेण सह सम्भाषणीयं, प्रीतिः दर्शनीया, तदीया मैत्री सम्पादनीया च। कथादयः च मध्ये मध्ये वक्तव्याः। प्रीतिकारणतः सः यदा भवद्वचनपालकः भविष्यति तदा एव तस्य अध्यापनाय अध्यापकाः नियोक्तव्याः । व्याघ्रस्य मुखरोम्णां सङ्ग्रहे यत् धैर्यं चातुर्यं च दर्शितं तदैव धैर्यं चातुर्यं च पुत्रविषये दर्शनीयं भवता। तदा भवान् निश्चयेन विजयं प्राप्नुयात्'' इति उक्त्वा मुनिः आसनात् उत्थितवान्।

आश्रमात् प्रत्यागतः राजा आत्मना ज्ञातस्य उपायस्य अनुसरणम् आरब्धवान्। पुत्रेण सह धैर्येण प्रीत्या च व्यवहरन् सः अल्पे एव काले पुत्रस्य प्रीतिं सम्पादितवान् अपि। 'पिता मयि स्निह्यति' इति अवगच्छन् राजकुमारः पितुः आज्ञायाः पालकः जातः।

ततः राज्ञा तस्य बोधनाय शिक्षकाः नियुक्ताः। कदाचित् सः मन्त्रिणम् अवदत् ''पुत्रस्य परिष्कारविषये मया पाठाः पठिताः, अनन्तरम् एव पाठनाय व्यवस्था कृता'' इति।

## स्वप्नवासवदत्तम् ( ग्रन्थपरिचयः )

व्योम शाहः

अनुवर्तते....

महाकविभासविरचिते स्वप्नवासवदत्ताभिधे नाटके एतावता अस्माभिः दृष्टं यत् प्रच्छन्नवेषधारी यौगन्धरायणः अवन्तिकारूपधारिणीं वासवदत्ताम् आश्रमे स्थापयति। द्वितीयाङ्के अवन्तिका (वासवदत्ता)-पद्मावत्याः मिथः मैत्री समुपवर्णिता। तृतीयाङ्के विवाहस्य सज्जताः प्रचलन्ति। तत्र वासवदत्ता दुःखेन पद्मावत्यै कौतुकमालिकां निर्माति। तया तत् कर्तव्यम् अभवद् इति खिन्ना सा ततः निर्गच्छति। उदयनपद्मावत्योः परिणयः अभवत्। चतुर्थेऽङ्के प्रमदवनस्य दृश्यं वर्तते। तत्र उदयन-विदूषकयोः संवादः भवति यत् वासवदत्ता-पद्मावत्योः कतरा तस्य प्रेयसी। उदयनः इतोऽपि वासवदत्तां स्मरति। अथ कदाचित् पद्मावत्याः शीर्षवेदना समुत्पन्ना। राजा विदूषकश्च समुद्रगृहकं प्राप्नुतः किं नु पद्मावती तत्र न दृष्टा। श्रान्तः राजा तत्र शयनीये स्वपिति विदूषकश्च तं कथया विनोदयति।

कञ्चुकीयः प्रविश्य निवेदयति – रुमण्वान् महता सैन्येन आरुणिम् अभिघातयितुं समागतः। उदयनोऽपि आक्रमणार्थं सज्जतां कुरुते। षष्ठाङ्कस्य प्रवेशकेन ज्ञायते यद् उदयनेन आरुः जितः। राजा घोषवतीवीणाश्रवणाद् वासवदत्तास्मरणे पुनरपि बद्धचित्तः। विदूषकेन प्रतिबोधितोऽपि सः सन्तापाद् न विरमति। राज्ञा विदूषकः घोषवतीवीणानयनार्थं प्रेषितः। कश्चित् प्रतिहारी महासेनस्य 'कञ्चुकीय आगतः' इति निवेदयति। प्रवेशयितुम् आदिष्टः नृपेण। तदैव पद्मावती समागता। उभावपि उपविश्य कञ्चुकीयस्य वासवदत्ताधात्र्याश्च स्वागतं कुरुतः। परस्परं कुशलवार्तापृच्छानन्तरं यदा धात्री राज्ञीपक्षतः कुशलत्वम् आपृच्छति तदा कञ्चुकीयः सन्तापं प्रकटयति। कञ्चुकीय समाश्वसिति **''कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।**

**एवं लोकस्तुल्यधर्मा वनानां काले काले छिधते रुह्यते च॥''**

अङ्गारवत्या महासेनस्य राज्या उदयनस्य पद्मावत्याश्च प्रतिकृतिः चित्रफलके एकस्मिन् विलिख्य प्रेषिता। तत्र उदयनेन सहोपविष्टा पद्मावती फलके वासवदत्तां दृष्ट्वा राज्ञे निवेदयति ''अस्या प्रतिकृत्याः सदृशी इह प्रतिवसति'' इति। तां दृष्टुम् उत्सुकः सः पद्मावत्या उक्तः यत् प्रोषितभर्तृका सा (कन्या) परपुरुषदर्शनं परिहरति।

एतावता प्रतिहारी प्रविश्य राज्ञे निवेदयति यत् उज्जयिनीयः ब्राह्मणः न्यासरूपेण निक्षिप्तां भगिनीं पद्मावत्याः ग्रहीतुं समागतः। पद्मावती अवन्तिकाम् आनेतुं याति। अवन्तिकया सह प्रविष्टा सा तस्यै भ्रातुः आगमनं निवेदयति। राजा पद्मावत्यै कथयति यत् न्यासः साक्षिमान् एव निर्यातयितव्यः। एवमुक्त्वा कञ्चुकीयं धात्रीं च साक्षिरूपेण स्थापयति। धात्र्यै समर्पिता अवन्तिका। तां दृष्ट्वा अनुक्षणं धात्र्याः उद्घोषितं यदियं वासवदत्ता। एतत् श्रुत्वा रूपसादृश्यं दृष्टुं राजा यवनिकासंक्षेपणम् आदिशति। यौगन्धरायणं वासवदत्तां च तत्र दृष्ट्वा सः चकितः। यौगन्धरायणः पादयोः पतित्वा क्षमां याचते। राजा तमुत्थाप्य तस्मै कृतज्ञतां प्रकटयति। यौगन्धरायणः अस्य प्रपञ्चस्य हेतुं राज्ञे निदेयति। ततः इमां कुशलवार्तां महासेननृपाय निवेदयितुम् उदयनं पद्मावतीं च प्रतिनिवर्तितुं यौगन्धरायणः अभिदधाति। अस्य समाप्तिः भरतवाक्येन भवति –


**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।**

**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥** इत्यक्तं विस्तरेण॥

## मासवार्त्ताः

**सम्पन्नः संस्कृतग्रीष्मवर्गः**





मईमासस्य १ दिनाङ्कतः ११ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थाने संस्कृतग्रीष्मवर्गस्य आयोजनम् अभवत्। शिबिरेऽस्मिन् Sr.Kg. तः ८ कक्ष्यायाः छात्राणां कृते बालसंस्कृतवर्गाः, दशमकक्ष्यायाः छात्राणां कृते संस्कृतव्याकरणवर्गाः च आयोजिताः । अत्र उल्लेखनीयं यत् मईमासस्य १४ दिनाङ्कतः २३ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य गान्धिनगरकेन्द्रे अपि बालसंस्कृतवर्गस्य आयोजनम् अभवत् । आयोजिते ग्रीष्मवर्गे डॉ. मिहिरः उपाध्यायः, श्रीपारुलः व्यासः, दिशा परमारः, अमी गोहेलः, रागिणी गोवाडिया च छात्रेभ्यः मार्गदर्शनं प्रायच्छन्। संस्कृतस्य अध्ययनेन छात्राः आनन्दिताः आसन्।

## अतिप्राचीनानि शिलाङ्कितानि चित्राणि



मध्यप्रदेशस्य राजधान्याः भोपालनगरात् ४० क्रोशमिते दूरे बिम्बेटकनामकं स्थानम् अस्ति । क्रिस्ताब्दात् ६०० तमात् वर्षात् पूर्वतनानि शिलाङ्कितानि चित्राणि दृश्यन्ते तत्रत्यासु गुहासु । भूमौ उपलभ्यमानेषु अतिप्राचीनानि वर्णरञ्जितानि मानवजीवनसङ्केतकानि एतानि इति विश्वस्यते सर्वैः तज्ज्ञैः।

लक्षात् वर्षेभ्यः पूर्वं रचितानि एतानि चित्राणि केनचित् पुनर्नवीकृतानि स्युः इति भासते एतेषाम् आकृतेः दर्शनात्। मानवानां, पशूनां, पक्षिणां च चित्राणि, रेखा-वर्तुल-चतुष्कोण-प्रभृतिभिः निर्मितानि दृश्यन्ते अत्र। पचतः क्रीडतः युद्ध्यमानान् च जनान् ध्योतयन्ति एतानि चित्राणि मानवानां प्रगतिं सूचयन्ति। मृगयावृत्तितः कृषिकत्वप्राप्तिः, ततः परिवार-व्यवस्थायाः अवलम्बनं च सूचयन्ति एतानि । पुरुषाः स्त्रियः च अत्र परस्परं हस्तं गृहीत्वा नृत्यन्तः शोभायात्रादिद्वारा उत्सवम् आचरन्ति स्म इति अवबुध्यते । आश्चर्यं नाम एतादृश्यः भव्यकलापूर्णाः गुहाः केवलेभ्यः पञ्चाशतः वर्षेभ्यः पूर्वम् एव मानवस्य दृष्टिपथम् आगताः इति।

## कृपया हसन्तु

नमनः - (मातुलम् उद्दिश्य) भोः मातुल ! भवतः दृष्टौ मम मूल्यं कियत् अस्ति ?

मातुलः - भोः भागिनेय ! तव मूल्यम् अहं कथं निश्चेतुं शक्नोमि ? त्वं तु मम कृते अमूल्यः असि ।

नमनः - एवं न । स्पष्टं वदतु मातुल ! भवतः दृष्टौ मम मूल्यं लक्षरूप्यकाणि सन्ति उत कोटिरूप्यकाणि ?

मातुलः - भोः तव मूल्यं तु कोटिरूप्यकाणि एव ।

नमनः - तर्हि तेभ्यः पञ्चसहस्रं रूप्यकाणि प्रेषयतु कृपया ।

★ ★ ★ ★ ★

कलहकारणात् दम्पती न्यायालयं प्रति अगच्छताम् । सर्वं श्रुत्वा न्यायाधीशः निर्णयं श्रावयन् पतिं नमनम् अवदत् - 'अद्यारभ्य त्वया तव पत्न्यै प्रतिमासं तव आयस्य अर्धभागः दातव्यः भविष्यति ।' न्यायाधीशस्य वचनं श्रुत्वा नमनः उच्चैः हास्यम् आरब्धवान् । हसन्तं नमनं दृष्ट्वा न्यायाधीशः कोपेन - 'भोः किमर्थं त्वं हसन् असि ?' तदा नमनः अवदत् - 'पूर्वं तु सा मम सम्पूर्णम् आयमेव स्वीकरोति स्म ।'

★ ★ ★ ★ ★

रुग्णः - (वैद्यम् उद्दिश्य) भोः वैद्यमहोदय ! मम शस्त्रक्रियायाः कियान् व्ययः भविष्यति इति तु कथयतु ।

वैद्यः - पञ्चदशलक्ष-रूप्यकाणि केवलम् ।

रुग्णः - भोः पञ्चदशलक्षरूप्यकैः तु अहं नूतनं कारयानं क्रेतुं शक्नोमि ।

वैद्यः - मया तदेव क्रेतव्यम् अस्ति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः सम इह परितोषो निर्विशेषो विशेषः ।**
**स तु भवति दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोर्थवान् को दरिद्रः ॥**

**तात्पर्यम्** – कश्चन संन्यासी राजानम् उद्दिश्य वदति – आश्रमे वसन्तः वयं वल्कलवस्त्रैः एव सन्तुष्टाः स्मः । भवान् कौशेयवस्त्राणि धरन् सन्तोषम् अनुभवति । भवतः मम च सन्तोषः समानः एव । तत्र न कोपि भेदः । यस्य तृष्णा अधिका अस्ति सः एव दरिद्रः । मनः यदि तृप्तं स्यात् तर्हि कः धनिकः ? कः दरिद्र ?

**विकासयति सद्भावान् विलोपयति दुर्गुणान् ।**
**विनाशयति विद्वेषान् कार्यं सङ्घटनात्मकम् ॥**

**तात्पर्यम्** – सङ्घटनेन युक्तं कार्यम् उत्तमान् भावान् विकासयति । दुष्टान् गुणान् नाशयति । विविधान् द्वेषान् विनाशयति च ।

**विकृतिं नैव गच्छन्ति सङ्गदोषेण साधवः ।**
**आवेष्टितं महासर्पैः चन्दनं न विषायते ॥**

**तात्पर्यम्** – सज्जनाः सहवासदोषेण मार्गभ्रष्टाः न भवन्ति । गन्धवृक्षं विषसर्पाः आवेष्टन्ते चेदपि चन्दनं विषयुतं न भवति ।

## ज्ञानसरित्

श्यामः पटेलः




**महाबीजवत् फलम् 'कोको-द-मेर'** - समुद्रतटे नारिकेलस्य ताडस्य पूगीफलस्य च उन्नताः वृक्षाः दृश्यन्ते। विश्वस्य प्रायः सर्वेषु समुद्रतटप्रदेशेषु नारिकेलस्य खर्जूरस्य च वृक्षाः लवणयुक्तजलस्थानेऽपि मधुरं फलं जनयन्ति इत्यैव काचित् विशेषता। तादृशः एकः वृक्षः समुद्रतटे भवति यस्य फलं नारिकेलद्वयम् यावत् परिमितस्य भवति। तस्य नाम 'कोको-द-मेर'। अस्य बीजं विश्वस्य बृहत्तमं बीजम् अस्ति। अयं कश्चित् विशिष्टः वृक्षः। अस्य औन्नत्यं पञ्चविंशति-मीटरमितत: त्रिंशत्मीटरमित-पर्यन्तं भवति। पर्णानि तु सप्तमीटरमितं यावत् दीर्घाणि भवन्ति। पुष्पम् अपि एकमीटरमितं दीर्घं भवति। यदा वृक्षः षड्वर्षीयो भवति तदा वृक्षोऽयं फलति। किन्तु वर्षद्वयान्ते फलं पक्वं भवति। पक्वस्य फलस्य भारः प्रायः सप्तदशतः विंशतिकिलोग्राममित-पर्यन्तं भवति। अस्य लम्बवृत्ताकारस्य फलस्य उपरि नारिकेलमिव आवरणं भवति। तस्मिन् फले त्रीणि चत्वारि वा बीजानि भवन्ति। तान्यपि बृहन्ति भवन्ति। एतानि फलानि समुद्रजले तरन्ति। प्रथमवारं ख्रीष्टाब्दस्य १७६९ तमे वर्षे केचन धीवराः फलमिदं दृष्टवन्तः। भयोत्पादक-आकारत्वात् धीवराः इदं राक्षसस्य फलमिति वदन्ति स्म। अस्य तु नैकाः किंवदन्त्यः अपि धीवरजगति श्रूयन्ते।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **अजिह्मम्** | सीधा | straight |
| **अनकेलोचनः** | महादेव | mahadev |
| **अर्णस्** | जल | water |
| **आम्नायः** | वेद | veda |
| **आयत्तम्** | अधीन | dependent on |
| **उपप्लवः** | विपत्त | misfortune |
| **ऊर्णायुः** | मकड़ी | spider |
| **काष्ठतक्षकः** | सुथार | carpenter |
| **कुद्दालः** | कुदाली | a kind of spade |
| **क्षुल्लः** | छोटा | little |
| **छविः** | आभा | splendour |
| **जलवायसः** | कौड़िल्ला पक्षी | diver (bird) |
| **दक्षजापतिः** | चन्द्र | moon |
| **दम्भोलिः** | वज्र | thunderbolt |
| **देशिकः** | स्थानीय | native |

## किं भवन्तः जानन्ति ?

**१ ) प्रसिद्धं ताजमहलस्थापत्यं भारतस्य कस्मिन् नगरे स्थितं वर्तते ?**

(क) दिल्लीनगरे (ख) आगरानगरे (ग) प्रयागनगरे (घ) मथुरानगरे

**२ ) बहाईधर्मानुयायिभिः निर्मितं प्रसिद्धं कमलमन्दिरं कस्मिन् नगरे अस्ति ?**

(क) मुंबईनगरे (ख) दिल्लीनगरे (ग) नागपुरनगरे (घ) लखनऊनगरे

**३ ) प्राचीनः विश्वविद्यालयः नालन्दा सम्प्रति कस्मिन् राज्ये वर्तते ?**

(क) मध्यप्रदेशे (ख) राजस्थाने (ग) बिहारे (घ) उत्तरप्रदेशे

**४ ) बौधधर्मस्य प्रसिद्धं तीर्थस्थलं सारनाथः कस्मिन् प्रान्ते अस्ति ?**

(क) मध्यप्रदेशे (ख) बिहारे (ग) उत्तरप्रदेशे (घ) कश्मीरे

**५ ) साँचस्तूपस्थापत्यानि कस्मिन् नगरे वर्तन्ते ?**

(क) प्रयागे (ख) वाराणस्याम् (ग) हरिद्वारे (घ) गयायाम्

**६ ) एतेषु कः संसारस्य उन्नततमः पर्वतः वर्तते ?**

(क) धौलगिरिः (ख) कञ्चनजङ्गा (ग) हिमालयः (घ) गोवर्द्धनः

**७ ) प्रसिद्धा अमरनाथगुहा भारतस्य कस्मिन् प्रान्ते वर्तते ?**

(क) हिमाचले (ख) कश्मीरे (ग) गुजराते (घ) आन्ध्रप्रदेशे

उत्तराणि – (१) ख (२) ख (३) ग (४) ग (५) ख (६) ग (७) ख

# अस्माकम् आगामिकार्यक्रमाः

Offline

EKLAVYA SANSKRIT ACADEMY

Admission Open

**Value Education Through Sanskrit**

# बालसंस्कृतवर्गः



**(Class Skg to 4 & 5 to 8)**

**Date :** 15/6/25 to 29/3/26
**Day :** Sunday
**Time :** 11.00am to 12.30pm
**Fees :** 8000/-

**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

Offline

EKLAVYA SANSKRIT ACADEMY

Admission Open

**Value Education Through Sanskrit**

# बालसंस्कृतवर्गः



**(Class Skg to 4 & 5 to 8)**

**Date :** 22/6/25 to 29/3/26
**Day :** Sunday
**Time :** 10.00am to 11.30am
**Fees :** 8000/-

**Venue:**
Satva vatika
Opp Randesan Metro station
Gandhinagar

**Contact:**
Dr. Mihir Upadhyay
+(91) 98246 16237
Ila Joshi
+(91) 63510 34630

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006